नाऽयसे ऋ० १,५७,२ "अयसे गमनाय" भा० अयसा-निर्म्मितम् अण् । आयसम् लौहमये कटाहादौ अयसो-विकारः अण् आयसः । लौहविकारे 'अयस्कान्तद्रवायसम्' रघुः "आयसेन तु पात्रेणेत्यादि २७८ पृष्ठे दर्शितम् । मयट् अयोमयः । वेदे तु अयस्मयादि० नि० अयस्मयः । लोहविकारे त्रि० स्त्रियां ङीप् । चतुरर्थ्यां छण् । आयसीयः अयस्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप् । एति यज्ञस्थानम् इण असुन् । ३वह्नौ पु० । "अयाश्चाग्नेऽस्यनभिशस्तयाश्च सत्वमित्त्वमया असि । अयानो यज्ञं वहास्यया नोऽवेहि भेषजम्" यजु० । ४हिरण्ये निरु० "रक्षोहा विचर्षणिरभियोनि-मयोहतम् अभ्यनूषतायोहतम् ऋ० ६,१,२,८०, "अय इति हिरण्यनामेति भा० "हिरण्यपाणिः प्रति-दोषमास्थात् अयोहनुर्यजते इति ऋ० ६,७१,१, अयोहनुर्हिरण्मयहनुः" भा० ।

**अयस्कंस** पु०न० । अयोविकारः कंसं पात्रं सत्वम् । लौहनिर्म्मिते पानपात्रे ।

**अयस्कर्णी** स्त्री अय इव कर्णावस्य गौ० ङीष् । लौह-तुल्यकठिनकर्णयुक्तायां स्त्रियाम् ।

**अयस्कान्त** पु० अयस्सु कान्तः रमणीयः कस्कादि-त्वात् सत्वम् । (कान्तिलौह) इति ख्याते १लौहभेदे । अयसां कान्तः इष्टः सन्निधिमात्रेणाकर्षकत्वात् । सन्निधि-मात्रेण लौहाकर्षके (चुम्बक) इति ख्याते २प्रस्तरभेदे । "शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लौहवत्" कुमा० "स चकर्ष परस्मात्तदयस्कान्तमिवायसम्" रघुः । अयस्कान्तेनाकर्ष-णीयशल्यापनयनार्थे ३व्रणचिकित्साभेदे यथोक्तं सुश्रुते "अनुलोममनवबद्धमकर्णमनल्पव्रणमुखमयस्कान्तेन" ।

**अयस्काम** त्रि० अयः कामयते कम—अण् उप०स० सत्वम् । लौहाभिलाषिणि । [सत्वम् । लौहकारे (कामार) ।

**अयस्कार** त्रि० अयोविकारं करोति कृ—अण् उप०स०

**अयस्कुम्भ** पु० अयोविकारः कुम्भः सत्वम् । लौहमये घटे ।

**अयस्कुशा** स्त्री अयःसहिता कुशा शाक०त० सत्वम् । लौहसहितकुशायाम् ।

**अयस्कृति** स्त्री अयसा कृतिः चिकित्साप्रक्रिया सत्वम् । सुश्रु-तोक्ते महाकुष्ठचिकित्साभेदे "अथ ऊर्द्ध्वमयस्कृतीर्व्याख्यास्यामः । तीक्ष्णलोहपत्राणि तनूनि लवणवर्गप्रदिग्धानि गोमयाग्नि-प्रतप्तानि त्रिफलाशालसारादिकषायेण निर्वापयेत् षोड़श-वारांस्ततः खदिराङ्गारतप्तान्युपशान्ततापानि सूक्ष्म-चूर्णानि कारयेद्गाढतान्तवपरिस्रावितानि ततो यथाबलं मात्रां सर्पिर्मधुभ्यां संसृज्योपयुञ्जीत । जीर्णे यथाव्याध्य-नम्लमलवणमाहारं कुर्व्वीत । तुलामुपयुज्य कुष्ठमेहमेदः-श्वयथुपाण्डुरोगोन्मादापस्मारानपहृत्य वर्षशतं जीवति तुलायां तुलायां वर्षशतमुत्कर्षः । एतेन सर्व्वलौहेष्वय-स्कृतयो व्याख्याताः ।

**अयस्थूण** पु० अयोनिर्म्मितः स्थूणः वा विसर्गलोपः । लौह-मये १गृहस्थूणे ६ब० । तथाविधगृहस्थूणायुक्ते २गृहस्थे । "अयस्थूणगृहपतीनां वै" शतब्रा० अयस्थूणा गृहपतय-स्तेषामिति तेषाम् हीनद्रव्यकत्वादाक्षेपः भा० । ७त० ३अयोमयाक्षे रथादौ त्रि० । "व्युष्टावयस्थूणमुदिता सूर्य्यस्य" ऋ० ५,६२,८, अयस्थूणमयोमयशङ्कुं गर्त्तं रथं वेति भा० । ४ऋषिभेदे पु० तस्य गोत्रम् अण् आयस्थूणः तस्य बहुषु लुक् । अयस्थूणाः । गौ० पाठात् ङीष् अयस्थूणी ।

**अयस्पात्र** न० अयोमयं पात्रं सत्वम् । लौहमये पात्रे ।

**अयस्मय** त्रि० अयोविकारः अयस्+मयट् वेदे नि० भत्वम् स्त्रियां ङीप् । अयोमये लौहमये "असुरा एषु लोकेषु पुरश्चक्रिरेऽयस्मयीमेवास्मिँल्लोके रजतामन्तरीक्षे हरिणीं दिवि" शतब्रा० । "भूम्या अयस्मयम् पात्रं" अथ० ५,२८,६, शतस्फ्यैरयस्मयीः अथ० ४,३७,८, छन्दसीति प्रायिकं तेन लोकेऽपि 'परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयम्' भा०आ०प० "ततः शक्तिं गृहीत्वा तु रुक्मदण्डमयस्मयीम् भा०द्रो०प० ।

**अयस्मयादि** पु० ६त० "अयस्मयादीनि छन्दसि" पा० उक्ते भत्वादिकार्य्यार्थे निपाताङ्गे अकृतिगणभेदे ।

**अयाचित** न० याच+क्त न०त० । १अमृताख्यवृत्तौ "अमृतं स्यादयाचित"मिति मनुः । १अप्रार्थिते त्रि० । "अया-चितोपस्थितमम्बु केवलम्" "अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः" स्मृतिः "याचेर्दुहादिपाठात् गौणे कर्म्मणि" क्त । यस्य सकाशेन याच्यते ३तस्मिन् जने च ।

**अयाज्य** त्रि०न याजयितुमर्हः यज-णिच्-कर्म्मणि यत् न०त० । पतितादौ स्मृतिनिषिद्धयाजने । ते च स्मृतौ दर्शिताः यथा देवलः "पतितेन सहोषित्वा जानन् संवत्सरं नरः मिश्रित-स्तेन सोऽब्दान्ते स्वयञ्च पतितो भवेत् । याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम् । कृत्वा सद्यः पतत्येष पतितेन न संशयः । बौधा० "संवत्सरेण पतति पतितेन न संशयः याजनाध्यापनाद्यौनात् सद्यो न शयनासनात्" ।